नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **28**

# S-71-Sanskrit (T.L.) (Supp.)

No. of Printed Pages – **12**

## माध्यमिक पूरक परीक्षा, 2018

## SECONDARY SUPPLEMENTARY EXAMINATION, 2018

## तृतीय भाषा – संस्कृतम्

समय : $3\frac{1}{4}$ (सपाद होरात्रयम्)

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः ।



Downloaded from www.cclchapter.com

1. अधोलिखितस्य पाठ्यपुस्तकस्य पठितगद्यांशस्य सप्रसङ्गं हिन्दीभाषायाम् अनुवादं लिखत : **1 + 4 = 5**

अस्ति गोदावरी तीरे विशालः शाल्मली तरुः । नानादिग्देशादागत्य रात्रौ पक्षिणो तत्र निवसन्ति । अथ कदाचिद् अवसन्नायां रात्रौ अस्ताचल–चूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनक नामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयम् आयान्तं व्याघम् अपश्यत् । तम् अवलोक्य अचिन्तयत् – "अद्य प्रातरेव अनिष्टदर्शनं जातम्, न जाने किम् अनभिमतं दर्शयिष्यति ।" अतः तदनुसरण–क्रमेण व्याकुलश्चलितः ।

**अथवा**

चतुर्दिक्षु जलं नैव, अन्नं नैव, तृणं नैव । आसीत् केवलं क्षुत्पिपासयोः अखण्डं साम्राज्यं, प्राणिनामार्तनादश्च । शमीवृक्षाणां त्वचं भरुट–संज्ञकं घासं च खादित्वा मनुष्याः यथाकथञ्चित् प्राणान् रक्षितवन्तः । पशवः प्रायः कालकवलिताः । एतौ मातापुत्रौ अपि जनपदात् जनपदं ग्रामात् ग्रामं च अटन्तौ आस्ताम् । अस्मिन्नेवान्तरे सततं दुर्भिक्षप्रतारणैः जर्जरिता बलवदस्वस्था च वीरमा–जनन्यपि षोडशवर्ष देशीयम् किशोरम् एकलं विहाय दिवं प्रयाता ।

2. अधोलिखितस्य पाठ्यपुस्तकात् पठितपद्यांशस्य सप्रसङ्गं हिन्दीभाषायाम् अनुवादं लिखत : **1 + 4 = 5**

गायन्ति देवा किल गीतकानि,

धन्यास्तु ते भारत–भूमि–भागे ।

स्वर्गापवर्गस्पदमार्ग–भूते,

भवन्ति भूयः पुरुषाः सुरत्वात् ।।

**अथवा**

न भोगभवने रमणीयम्,

न च सुखशयने शयनीयम् ।

अहर्निशं जागरणीयम्,

लोकहितं मम करणीयम् ।।



Downloaded from www.cclchapter.com

3. अधोलिखितस्य पाठ्यपुस्तकस्य पठित–पद्यांशस्य सप्रसङ्गं संस्कृते व्याख्या कार्या : **1 + 3 = 4**

सम्प्राप्य भारते जन्म सत्कर्मसु पराङ्मुखः ।

पीयूष – कलशं हित्वा विषभाण्डमुपाश्रितः ।।

**अथवा**

अनुकूले विधौ देयं यतः पूरयिता हरिः ।

प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ।।

4. अधोलिखितस्य पाठ्यपुस्तकात् पठितनाट्यांशस्य सप्रसङ्गं संस्कृते व्याख्या कार्या : **1 + 2 = 3**

प्रथमा – शृणोतु महाराजः ! एषाऽपराजिता नामौषधिरस्य जातकर्मसमये भगवता मारीचेन दत्ता । एतां किल मातापितरावात्मानं च वर्जयित्वाऽपरो भूमिपतितां न गृह्णाति ।

राजा – अथ गह्णाति ?

प्रथमा – ततस्तं सर्पो भूत्वा दशति ।

राजा – भवतीभ्यां कदाचिदस्याः प्रत्यक्षीकृता विक्रिया ?

उभे – अनेकशः

**अथवा**

भामाशाहः – (प्रणम्य) अन्नदातः ! सेवकं सन्त्यज्य क्व प्रस्थीयते श्रीमता ?

प्रतापः (दीर्घं निःश्वस्य) न क्व अपि बन्धो ! गन्तुं शक्यम् अपि तु न । पार्श्वे धनं नैव, न च सेना एव । अहं स्वदेशं कथं रक्षेयम् ? अस्माद् एव मनः दोलायितम् अस्ति ।

भामाशाहः – महाराज ! यदा इमान् समाचारान् अशृण्वम् तदा हृदयं मे भग्नम् इव अभवत् (धनग्रन्थिं निर्दिश्य) इयं पुनः सम्पत्तिः कस्मै प्रयोजनाय ? यदि ईदृशे एव अवसरे न इयम् उपयुज्येत ।

प्रतापः – भवान् सत्यं वदति ।



Downloaded from www.cclchapter.com

5. अधोलिखितेषु अष्टसु केषाञ्चन षट् प्रश्नानाम् उत्तराणि संस्कृते लिखत : ½ × **6** = **3**

(i) "महाराणाप्रतापः" पाठानुसारेण अकबरस्य सेनया सह प्रतापस्य मुख्ययुद्धं कुत्र अभवत् ?

(ii) "भारत-वैभवम्" इति पाठः कस्मात् ग्रन्थात् संकलितः ?

(iii) स्वामिकेशवानन्दस्य गुरुः कः आसीत् ?

(iv) "सुभाषित-रत्नानि" इति पाठानुसारेण सर्वे जन्तवः केन तुष्यन्ति ?

(v) "स्वदेशं कथं रक्षेयम्" इति पाठानुसारेण "शत्रून् संहारयितुं धर्मं रक्षितुं च योत्स्यते, योत्स्यते अवश्यं योत्स्यते" ! इति कः कथितवान् ?

(vi) "यो यद्वपति बीजं हि लभते तादृशं फलम्" इति पाठानुसारेण सर्पेण शनैः शनैः यथाकालं किं कवलितम् ?

(vii) "मरुसौन्दर्यम्" इत्यस्मिन् पाठे कस्य ऋतोः वर्णनं अस्ति ?

(viii) "आचार्योपदेशः" इति पाठानुसारेण आचार्यः कम् उपदिशति ?

निर्देश : प्रश्नसंख्या **6 – 9** पर्यन्तं रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत –

6. सर्वथा अविचारितं <u>कर्म</u> न कर्तव्यम् । **1**

7. <u>हिमालयात्</u> समारभ्य यावदिन्दुसरोवरम् । **1**

8. <u>मया</u> सहैव सा आगतवती । **1**

9. तव <u>चरणौ</u> प्रणमामः **1**

10. प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखत – 1½ + 1½ = 3



Downloaded from www.cclchapter.com

11. अधोलिखितं गद्यांश पठित्वा एतदाधारित–प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत –

संस्कृत – साहित्ये अर्थगौरवाय प्रसिद्धतमस्य किरातार्जुनीय–महाकाव्यस्य रचनाकारः महाकविः भारवि अल्पायुष्वेव काव्यकोष–व्याकरणादीनाम् अध्ययनम् अकरोत् । स श्रेष्ठानि पद्यानि विरचय्य जनानां मनोरञ्जनं करोति स्म । शीघ्रमेव बहवः जनाः तस्य प्रशंसकाः अभवन् । एकवारं केचन जनाः भारवेः पितुः समीपम् आगत्य अवदन्–भवान् भाग्यवान् अस्ति यत् भवतः पुत्रः अल्पे वयस्येव काव्य–रचनायां निपुणः संजातः । वस्तुतः भवतः पुत्रः भारविः योग्यतमः अस्ति । भारवेः पिता तत्कालीनः प्रौढतमः विद्वान् आसीत् । सः अवदत्–भवन्तः व्यर्थमेव भारविं तथा प्रशंसन्ति । स तु किमपि न जानाति । एवमेव स सदा भारविं निन्दति स्म । वारं वारं पितुः मुखात् स्वनिन्दां श्रुत्वा भारवेः हृदये क्रोधरूपः पावकः प्रज्वलति स्म । स यशः प्राप्तावात्मनः पितरमेव बाधकतमं ज्ञात्वा तं मारयितुं निश्चयम् अकरोत् । दृढ–निश्चयः भारविः रात्रावागत्य प्रस्तरप्रहारेण स्व–पितरं मारयितुं तस्य शयनं प्रतीक्षते स्म । तदानीमेव स माता–पित्रोः वार्तालापम् अशृणोत् । भारवेः पिता स्व–पत्नीं वदति स्म यत् –पश्य ! चन्द्रस्य प्रकाशः सर्वत्र तथैव प्रसृतः यथा आवयोः पुत्रस्य भारवेः यशः प्रकाशः सर्वत्र प्रसृतः अस्ति । तदा भारवेः माता अपृच्छत् – हे स्वामिन् ! यदा अन्ये जनाः भारविं प्रशंसन्ति तदा भवान् तं कथं निन्दति ? तदा भारवेः पिता अवदत् – प्रिये ! अधिकसम्मानेन प्रशंसया च अभिमानः उद्भवति । अभिमानेन च उन्नतिमार्गः बाधितः भवति ।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत । **1**

(ख) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत :

(i) किरातार्जुनीय–महाकाव्यस्य रचनाकारः कः अस्ति ? **1**

(ii) भारविः केन प्रहारेण स्वपितरं मारयितुं तस्य शयनं प्रतीक्षते स्म ? **1**

(iii) भारविः कयोः वार्तालापम् अशृणोत् ? **1**

(iv) भारवेः पिता स्व–पत्नीं किम् अवदत् ? **1**

(v) उन्नतिमार्गः केन बाधितः भवति ? **1**



Downloaded from www.cclchapter.com

(ग) यथानिर्देशं प्रश्नानाम् उत्तराणि लिखत :

(i) "यदा अन्ये जनाः भारविं प्रशंसन्ति" अत्र कर्तृपदं लिखत । **1**

(ii) "श्रेष्ठानि पद्यानि विरचय्य जनानां मनोरञ्जनं करोति स्म" अत्र विशेषणपदं लिखत् । **1**

(iii) "एवमेव स सर्वदा भारविं निन्दति स्म" अत्र "स" इति सर्वनामपदस्य स्थाने संज्ञापदं लिखत । **1**

(iv) "अग्निः" इति पदस्य गद्यांशात् चित्वा पर्यायपदं लिखत । **1**

12. अधोलिखितपदयोः सन्धि-विच्छेदं कृत्वा सन्धेः नामापि लिखत :

(i) वध्वागमः **1**

(ii) वागीशः **1**

13. अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत :

(i) चे + अनम् **1**

(ii) निः + छलः **1**

14. अधोलिखितरेखाङ्कित-पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत :

(i) इदं सुकोमलं उपनेत्रम् अस्ति । **1**

(ii) एकपुरुषः क्षेत्रं रक्षति । **1**

(iii) छत्रं च उपानत् च अनयोः समाहारः । **1**



Downloaded from www.cclchapter.com

15. अधोलिखितरेखाङ्कितपदेषु विभक्तिं तत् कारणं च लिखत –

(i) तस्करः धनिकं प्रति पश्यति । 1

(ii) मात्रा सह भगिनी गच्छति । 1

(iii) कृष्णात् प्राक् रामः आसीत् । 1

16. कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखत ।

(i) ________ नर्तकी अपतत् । (नृत् + शतृ) 1

(ii) इयं ________ शिक्षिता अस्ति । (बालक + टाप्) 1

17. अधोलिखितवाक्ययोः रेखाङ्कितपदेषु प्रकृति–प्रत्ययं च पृथक् कृत्वा लिखत –

(i) मया शिक्षकः पूजनीयः । 1

(ii) सा श्रीमती विदुषी । 1

18. मञ्जूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत –

| इदानीम्, कुतः, उच्चैः कुत्र |
|---|

(i) पंकजः ________ क्रीडति । 1

(ii) सः गायकः ________ आगच्छत् । 1

(iii) बालकः कक्षायाम् ________ हसति । 1



Downloaded from www.cclchapter.com

प्रश्न संख्या **19 – 21** पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत ।

19. बालिका गृहकार्यं लिखति । **1**

20. अहं कथां पठामि । **1**

21. बालकेन पशुः दृश्यते । **1**

22. घटिका-चित्र-सहायतया अङ्कानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम् – (रिक्त-स्थाने)

(क) 


(ख) 


(i) बालकः प्रातः ________ उतिष्ठति **1**

(ii) माता ________ भोजनं पचति । **1**

23. अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखत –

(i) छात्रा लेखं लिखामि । **1**

(ii) पशुद्वयं क्षेत्रं चरतः । **1**

(iii) गुरुं नमः । **1**



Downloaded from www.cclchapter.com

24. आत्मानं दशम्याः कक्षायाः मोहितं मत्वा स्व विद्यालयस्य प्रधानाचार्याय क्रीडासामग्रीप्राप्त्यर्थम् एकं प्रार्थनापत्रं लिखत – **½ × 8 = 4**

**अथवा**

भवान् निर्मलः । स्वकीयं पितरं प्रति "परीक्षायां सफलतायै" अधोलिखितं पत्रं मञ्जूषापदसहायतया पूरयित्वा लिखत –

| |
|---|
| परीक्षायाम्, प्राप्य, मम, स्थितिः, अद्यैव, विषयाणि, ज्ञातवान्, सम्यक् |

कुसुमपुरतः

दिनाङ्कः 27-3-2018

श्रद्धेयेषु पितृचरणेषु,

सादरं प्रणामाः ।

भवदीयं स्नेहापूरितं पत्रम् _______ प्राप्तवान् । सम्पूर्णान् समाचारान् _______ । इदानीं _______ परीक्षा प्रचलति । परीक्षायां सैद्धान्तिक-सर्वाणि _______ प्रश्नपत्राणि _______ अभवन् । प्रायोगिक-विषयाणां _______ अपि समीचीना अस्ति । आशासे यत् _______ उत्तमान् अङ्कान् _______ कक्षायां श्रेष्ठस्थानं प्राप्स्यामि ।

भवदाज्ञाकारी पुत्रः

निर्मलः



Downloaded from www.cclchapter.com

25. मञ्जूषायाः उपयुक्तपदानि गृहीत्वा मित्र–संलापयोः मध्ये संवादं – रिक्तस्थानानि पूरयित्वा लिखत – **½ × 8 = 4**

| ग्रामात्, आदाय, मित्र !, ग्रामे, नमः, चिकित्सकः, कुतः, करोति |
|---|

गोपालः – ________ सुप्रभातम् ।

मोहनः – अहमपि तुभ्यं ________ निवेदयामि

गोपालः – त्वम् इदानीं ________ आगच्छसि ।

मोहनः – अहं ________ आगच्छामि ।

गोपालः – किं तव ________ चिकित्सालयः अस्ति ।

मोहनः – मम ग्रामे तु ________ अस्ति न चिकित्सालयः ।

गोपालः – चिकित्सकः रोगग्रस्त–जनानां सेवां ________ किम् ?

मोहनः – चिकित्सकः रोगग्रस्तजनानां सेवां चिकित्साशुल्कम् ________ करोति ।

26. अधोलिखितषड्वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतभाषायाम् अनुवादं लिखत – **1 × 4 = 4**

(i) माता के पास पुत्री रहती है ।

(ii) खेत में बकरी ले जाता है ।

(iii) पेड़ से पते गिरते हैं ।

(iv) तीनों पुस्तकें मेरी हैं ।

(v) शिक्षक बालकों को फल देता है ।

(vi) साधु आसन पर बैठता है ।



Downloaded from www.cclchapter.com

27. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि लिखत – ½ × 6 = 3

| |
|---|
| कर्षति, कृषकः, धान्यम्, एते, रोपयन्ति, क्षेत्रम् |



अथवा

अधोलिखितम् अनुच्छेदं मञ्जूषासहायतया रिक्तस्थानानि पूरयित्वा लिखत –

| |
|---|
| जननी, अपत्यानाम्, सन्तानस्य, पीत्वा, अपि, जगति |

(i) या जनयति सा ________ भवति ।

(ii) माता ________ निर्मात्री भवति ।

(iii) माता ________ चरित्रनिर्माणं करोति ।

(iv) सा ज्ञानदात्री ________ भवति ।

(v) अस्मिन् ________ मातुःस्थानं श्रेष्ठं भवति ।

(vi) वयं मातुः दुग्धं ________ सबलाः भवामः ।



Downloaded from www.cclchapter.com

28. अधोलिखितानि क्रमरहितानि वाक्यानि सन्ति । कथादृष्ट्या यथाक्रमं संयोजनं कृत्वा लिखत – **½ × 6 = 3**

(i) एकदा नृपः सुप्तः तदा एका मक्षिका नृपस्य नासिकायाम् उपाविशत् ।

(ii) तथापि सा पुनः पुनः नृपस्य नासिकायाम् उपविसति स्म ।

(iii) पुरा एकस्य नृपस्य एकः प्रियः वानरः आसीत् ।

(iv) मक्षिका तु उड्डीय दूरं गता किन्तु खड्ग–प्रहारेण नृपस्य नासिका छिन्ना अभवत् ।

(v) वानरः वारं वारं तां निवारयति स्म ।

(vi) अतः वानरः मक्षिकां हन्तु खड्गेन प्रहारम् अकरोत् ।



Downloaded from www.cclchapter.com